संस्कृतवेदान्त

2447

शंकराचार्य - प्रश्नोत्तररत्नमाला

४६४/23

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥श्रीशंकरं वंदे॥ अपारसंसारसमुद्रमध्ये निमज्जतो मे शरणं किमस्ति॥ गुरो कृपालो कृपया वदैतद्विश्वेशपादां-
बुजदीर्घनौका॥१॥ बद्धो हि को यो विषयानुरागी को वा विमुक्तो विषये विरक्तः॥ को वास्ति घोरो नरकः स्वदेहस्तृ-
ष्णाक्षयः स्वर्गपदं किमस्ति॥२॥ संसारहृत्कः श्रुतिजात्मबोधः को मोक्षहेतुः प्रथितः॥ द्वारं किमेकं नरक सएव
स्य नारी का स्वर्गदा प्राणभृतामहिंसा॥३॥ शेते सुखं कस्तु समाधिनिष्ठो जागर्ति को वा सदसद्विवेकी॥ के श-
का[illegible]वमि त्रवः संति निजेंद्रियाणि जितानि तानि॥४॥ को वा दरिद्रो हि विशालतृष्णः श्रीमांश्च को यस्य समस्त[illegible]तो-
त्राणि षः॥ जीवन्मृतः कस्तु निरुद्यमो यः का वामृतं स्यात्सुखदा निराशा॥५॥ पाशो हि को यो ममताभिधा-
नः संमोहयत्येव सुरेव का स्त्री॥ को वा महांधो मदनातुरो यो मृत्युश्च को वापयशः स्वकीयं॥६॥ को वा गु-
रुर्यो हि हितोपदेष्टा शिष्यस्तु को यो गुरुभक्त एव॥ को दीर्घरोगो भव एव साधो किमौषधं तस्य विचा-
र एव॥७॥ किं भूषणाद्भूषणमस्ति शीलं तीर्थं परं किं स्वमनो विशुद्धं॥ किमत्र हेयं कनकं च कांताश्रा-

व्यंसदाकिंगुरुवेदवाक्यं ॥८॥ केहेतवोब्रह्मगतेस्तुसंतिसत्संगतिर्दानविचारतोषाः ॥ केसंतिसंतोखिलवीतरागाः
अपास्तमोहाःशिवतत्वनिष्ठाः ॥९॥ कोवाज्वरःप्राणभृतांहिचिंतामूर्खोस्तिकोयस्तुविवेकहीनः ॥ कार्या
मयाकाशिवविष्णुभक्तिःकिंजीवनंदोषविवर्जितंयत् ॥१०॥ विद्याहिकाब्रह्मगतिप्रदायाबोधोस्तिकोय
स्तुविमुक्तिहेतुः ॥ कोलाभआत्मावगमोहिदेवे जितंजगत्केनमनोहियेन ॥११॥ शूरान्महाशूरतमो
स्तिकोवामनोजबाणैर्व्यथितोनयस्तु ॥ प्राज्ञोथधीरःसमस्तिकोवाप्राप्तोनमोहंललनाकटाक्षैः ॥१२॥ ज्ञात्ति
विषाद्विषंकिंविषयाःसमस्ताःदुःखीसदाकोविषयानुरागी ॥ धन्योस्तिकोयस्तुपरोपकारीकःपूजनीयो
ननुतत्वनिष्ठः ॥१३॥ सर्वास्ववस्थास्वपिकिंनकार्यंकिंवाविधेयंविदुषःप्रयत्नात् ॥ स्नेहश्चपापंप
ठनंचधर्मःसंसारमूलंचकिमस्तिविद्या ॥१४॥ विज्ञान्महाविज्ञतमोस्तिकोवानार्यापिशाच्या
नचवंचितोयः ॥ काशृंखलाप्राणभृतांहिनारीदिव्यंव्रतंकिंचनिरस्तदैन्यं ॥१५॥ ज्ञातुंनश

(2A)

श्र

क्यं हि किमस्ति सर्वैः योषिन्मनो यच्चरितं तदीयं ॥ काकुत्स्यजा सर्वज्ञनैर्दुरन्ता विद्याविहीनः पशुरस्ति को
वा ॥ १६ ॥ वासो न संगः सह कैर्विधेयो मूर्खैश्च पापैश्च खलैश्च नीचैः ॥ मुमुक्षुणा किं त्वरितं विधेयं सत्सं
गतिर्निर्ममतेशभक्तिः ॥ १७ ॥ लघुत्वमूलं च किमर्थितैव गुरुत्वमूलं यदयाचनं च ॥ जातोस्ति को य
स्य पुनर्न जन्म को वा मृतो यस्य पुनर्न मृत्युः ॥ १८ ॥ मूकोस्ति को वा बधिरोस्ति को वा युक्तं न वक्तुं स
मये समर्थः ॥ तथ्यं सुपथ्यं न शृणोति वाक्यं विश्वासपात्रं न किमस्ति नारी ॥ १९ ॥ तत्त्वं किमेकं शि
वमद्वितीयं किमुत्तमं सच्चरितं यदस्ति ॥ किं कर्म कृत्वा न च शोचनीयं कामारिकंसारिसम
र्चनाख्यं ॥ २० ॥ शत्रोर्महाशत्रुतरोस्ति को वा कामः सकोपानृतलोभतृष्णः ॥ न पूर्यते को वि
मूलं षयैः स एव किं दुःखं ममताभिमानः ॥ २१ ॥ किं मंडनं साक्षरता मुखस्य सत्यं च किं भूतहितं
यदेव ॥ त्यक्त्वासुखं किं प्रियमेव सम्यक् देयं परं त्वभयं सदैव ॥ २२ ॥ कस्यास्ति नाशो मन

किं×१

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

२ सोहि मोक्षः कुः सर्वथा नास्ति भयं विमुक्तौ शल्यं परं किं निजमूर्खतैव के के ह्युपास्या गुरवश्च वृद्धाः ॥ उपस्थिते
प्राणहरे कृतांते किमाशु कार्यं सुधिया प्रयत्नात् ॥ वाक्कायचित्तैः सुखदं यमघ्नं मुरारिपादांबुजमेव चिंत्यं
॥ २४ ॥ के दस्यवः संति कुवासनाख्याः कः शोभते यः सदसि प्रविद्यः ॥ मातेव का या सुखदा प्रविद्या किं
(3) मेधते दानवशात्सुविद्या ॥ २५ ॥ कुतो हि भीतिः सततं विधेया लोकापवादाद्भवकाननाच्च ॥ को
वास्ति बंधुः पितरौ च कौ वा विपत्सहायः परिपालको यो ॥ २६ ॥ बुध्वा न बोध्यं परिशिष्यते किं शिवं
प्रशांतं सुखबोधरूपं ॥ ज्ञाते तु कस्मिन्विदितं जगत्स्यात्सर्वात्मके ब्रह्मणि बोधरूपे ॥ २७ ॥ किं दुर्लभं पूर्ण
सद्गुरुरस्ति लोके सत्संगतिर्ब्रह्मविचारणा च ॥ त्यागो हि सर्वस्य शिवात्मबोधे किं दुर्जयं सर्वजनैर्म
नोजः ॥ २८ ॥ पशोः पशुः को न करोति धर्मं प्राधीतशास्त्रोपि न चात्मबोधः ॥ किं तद्विषं भाति सुधो
पमा स्त्री के शत्रवो मित्रवदात्मजाद्याः ॥ २९ ॥ विद्युच्चलं किं धनयौवनायुर्दानं परं किं च सुपात्रदत्तं २

द्यौः

(५)

३ ।। कंठं गतैरप्यसुभिनकार्ये किं किं विधेयं मलिनं शिवार्चा ।। किं कर्म यत्प्रीतिकरं मुरारेः क्वास्थान कार्या सतत
तं भवाब्धौ ।। अहर्निशं किं परिचिंतनीयं संसारमिथ्यात्वशिवात्मतत्वं ।। ३१ ।। कंठं गता वाश्रवणं गता वा प्र
श्नोत्तराख्या शिवरत्नमाला ।। तनोति मोदं विदुषां सुरम्यं रमेशगौरीशकथेव सद्यः ।। ।। इति श्रीमत्प
रमहंसपरीव्राजकाचार्यश्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवत्पादस्य कृतौ प्रश्नोत्तररं
त्नमाला संपूर्णा    श्रीशंकरसद्गुरुचरणार्पणमस्तु    श्रीरामाय नमः ।।

शा×३

अर्जितं भूरिकष्टेन पु

३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com